This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीमद्धार्दाः॥

॥अप्रमेयमप्रतीतनिर्मलज्ञानमूर्तये॥

॥अथन्यायबोधिनीप्रारंभः॥

॥मनोगिरांविदूरायदक्षिणामूर्तयेनमः॥१॥

॥श्री॥

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M1453
Dist Nagpur

Acc. No. ~~1876~~ M1453
Title - न्यायबोधिनी (Com. on. तर्कसंग्रह)
(संपूर्ण)
Author - गोवर्धन.
Date - ?
Sub - न्याय.
folio - 16
Xerox - 34
~~लिपिक - गंगाधरशास्त्री मंगरूळकर (नागपूर)~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१५

न्यसमानतापिकद्वेषायंतापनुपाःतियागिकर्मकर्तृत्वेनग्रन्थस्य [illegible]

[illegible] दुसमानेनपिंकत्वणायंतापन्नावृत्तियोगिक [illegible] कर्तृत्व [illegible]

श्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशाय नमः॥ श्रीमद्दक्षिणामूर्तिगुरवे नमः॥ अखिलागमसंचारि श्रीकृष्णाख्यं परं महः॥ ध्यात्वा गोवर्धनस्सु
धीस्तनुते न्यायबोधिनीं॥१॥ चिकीर्षितस्य ग्रंथस्य निर्विघ्नपरिसमाप्त्यर्थं इष्टदेवतानमस्कारात्मकं मंगलं शिष्यशिक्षार्थं
ग्रंथतो निबध्नाति॥ निधायेति॥ अथ पदार्थान्विभजते॥ द्रव्येति॥ अत्र सप्तग्रहणं पदार्थत्वं द्रव्या॰ द्रव्याद्यन्यतमत्वव्याप्यमि
ति व्याप्तिलाभाय॥ ननु शक्तिपदार्थस्याष्टमस्य सत्त्वात्कथं सप्तैवेति॥ तथा हि॥ वह्निसंयुक्तेंधनादौ सत्यपि मणिसंयो
गे दाहो न जायते॥ तच्छून्ये जायते। अतो मणिसमवधाने शक्तिर्नश्यति॥ मण्यभाववद्दशायां दाहानुकूलशक्तिरुत्पद्यत
इति कल्प्यते॥ तस्माच्छक्तिरतिरिक्तः पदार्थ इति चेन्न॥ मणेः प्रतिबंधकत्वेन तदभावस्य कारणत्वेनैव निर्वाहे मणिसम
वधानासमवधानाभ्यामनंतशक्तितद्ध्वंसकल्पनायां अन्याय्यत्वात्तस्मात्सप्तैव पदार्था इति सिद्धं॥ द्रव्याणि विभजते॥
पृथ्वीति॥ नन्वंधकारस्य दशमद्रव्यस्य सत्त्वात्कथं नवैवेति सिद्धं॥ तथा हि॥ नीलं तमश्चलतीति प्रतीतेः नीलरूपाश्र
यत्वेन क्रियाश्रयत्वेन च द्रव्यत्वं सिद्धं॥ न च क्लृप्तद्रव्येष्वंतर्भावात् कुतो दशमद्रव्यत्वमिति वाच्यं॥ आकाशादिपंचकस्य
नीरूपत्वाद्वाय्वोरपि न तेष्वंतर्भावः॥ तमसो निर्गंधत्वान्न पृथिव्यामंतर्भावः संभवति॥ जलतेजसोः शीतोष्णस्पर्शवत्त्वा
न्न तयोरंतर्भावः॥ तस्मात्तमसो दशमद्रव्यत्वं सिद्धमिति चेन्न॥ तेजसः अभावेनैवोपपत्तौ अतिरिक्तत्वकल्पनायां मा

कार्यत्वावच्छिन्नकार्यं प्रति प्रतिबंधकाभावस्यापि कारणतेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाधात्र नाभावात्॥ न च विनिगमनाविरहात्तेज एवांधकाराभावस्वरूपमिति वाच्यं॥ तेजसः अभावस्वरूपत्वे सर्वानुभूतोष्णस्पर्शाश्र स्या१
यी द्रव्यांतरकल्पने गौरवात्॥ तस्मादुष्णस्पर्शगुणाश्रयतया तेजसो द्रव्यत्वं सिद्धं॥ तमसि नीलरूपप्रतीतिस्तु भ्रांति
रेव दीपापसरणक्रियायाः एव तत्र भानात्॥ गंधवतीति॥ गंधवत्वं पृथिव्याः लक्षणं॥ लक्ष्यं पृथ्वी पृथिवीत्वं लक्ष्यतावछेदकं॥
यद्धर्मावछिन्नं लक्ष्यं स धर्मो लक्ष्यतावछेदकः॥ यो धर्मो यस्यावछेदकः स तद्धर्मावछिन्नः॥ तथा च॥ लक्ष्यतावछेदकं पृथ्वी
त्वं चेल्लक्ष्यता पृथ्वीत्वावछिन्ना एवं शीतस्पर्शवत्वादिलक्षणेषु जलादीनां लक्ष्यतावछेदकत्वं बोध्यं॥ एवं पृथिव्यादित्रयं नि
रूप्य वायुं निरूपयति॥ रूपरहितेति॥ रूपरहितत्वे सति स्पर्शवत्वं वायोर्लक्षणं॥ सति सप्तम्या विशिष्टार्थकतया रूपरहित
त्वविशिष्टस्पर्शवत्वं वायोर्लक्षणं॥ विशेषणांशानुपादाने स्पर्शवत्वमात्रस्य लक्षणत्वे पृथिव्यादित्रये तिव्याप्तिः॥ तद्वारणा
य विशेषणोपादानं॥ तावन्मात्रोपादाने आकाशादावतिव्याप्तिः॥ तत्र रूपरहितत्वस्य सत्वात्॥ अत उक्तं स्पर्शेति॥ अ
तिव्याप्तिर्नाम लक्ष्ये लक्षणसत्वं॥ यथा गोः शृंगित्वं लक्षणं कृतं चेल्लक्ष्यभूतगोभिन्ने महिषादावतिव्याप्तिः॥ तत्रा
पि शृंगित्वस्य विद्यमानत्वात्॥ अव्याप्तिर्नाम लक्ष्यैकदेशावृत्तित्वं॥ यथा गोर्नीलरूपवत्वं लक्षणं कृतं चेल्लक्ष्यैक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशग्रइतित्वं नाम लक्ष्यतावच्छेदकाश्रयीभूते क्वचि ल्लक्ष्ये लक्षणस्याभावः॥ असत्त्वमेव व्याप्तिरित्यर्थः॥ श्वेतगवि नीलरूप
स्याभावात्॥ असंभवो नाम लक्ष्यमात्रे कुत्रापि लक्षणासत्त्वं॥ यथा गोरेकशफत्वं गोसामान्यस्य द्विशफत्वेन एकशफता
भावात्॥ अतिव्याप्त्यव्याप्त्यसंभवानां निष्कृष्टलक्षणं॥ लक्ष्यतावच्छेदकसमानाधिकरणोऽसति लक्ष्यतावच्छेदकावच्छि
न्नप्रतियोगिताकभेदसामानाधिकरण्यमतिव्याप्तिः॥ अव्याप्तिस्तु लक्ष्यतावच्छेदकसमानाधिकरणे लक्ष्यतावच्छे ले३
व: दकसमानाधिकरणात्यंताभावप्रतियोगित्वं॥ असंभवस्तु॥ लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वं॥ अथ आ॥
आकाशं लक्षयति॥ शब्दगुणकमिति॥ अत्र गुणपदं आकाशशब्द एव विशेषगुण इति द्योतनाय न तु अतिव्याप्तिवारणाय
समवायेन शब्दवत्त्वमात्र[illegible]सम्यक्त्वात्तदुक्तं॥ रूपं गंधो रसस्पर्शः स्नेहः सांसिद्धिको द्रवः॥ बुद्ध्यादिभावनांता अश
ब्दो वैशेषिका गुणा इति॥ नन्वेकमिति॥ अनेकत्वे मानाभावात् अनुतिभावः॥ विभ्विति॥ सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं॥
मूर्तत्वं च क्रियाश्रयत्वं पृथिव्यप्तेजोवायुमनांसि मूर्तानि॥ पृथिव्यप्तेजोवाय्वाकाशपंचकं भूतपदवाच्यं॥ भूतत्वं नाम जो२
बहिरिंद्रियग्राह्यविशेषगुणवत्त्वं॥ कालं लक्षयति॥ अतीतेति॥ व्यवहारहेतुत्वस्य लक्षणत्वे घटइति व्यवहारहेतुघ्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्वापादानमिति व्यावृत्तिवारणायातीतेति विशेषणोपादानं॥ दिशो लक्षणमाह॥ प्राचीति॥ उदयाचलसंयुक्ता दिक् प्राची॥ अ-
ती॰ स्ताचलसंयुक्ता दिक् प्रतीची॥ मेरोः संनिहिता दिगुदीची॥ मेरोर्व्यवहिता दिग्दक्षिणा॥ आत्मानं निरूपयति॥ ज्ञानाधिकर-
णमिति॥ अधिकरणपदं समवायेन ज्ञानवत्त्वलाभार्थं॥ मनो निरूपयति॥ सुखादीति॥ उपलब्धिर्नाम साक्षात्कारः॥ तथा
च॥ सुखादिसाक्षात्कारकारणत्वे सतीन्द्रियत्वं मनसो लक्षणं॥ इन्द्रियत्वमात्रोक्तौ चक्षुरादावतिव्याप्तिः॥ अतः पूर्वदलं॥
विशेष्यानुपादाने आत्मन्यतिव्याप्तिः॥ आत्मनो ज्ञानादिकं प्रति समवायिकारणत्वात्॥ अत इन्द्रियत्वविशेष्योपादानं॥
रूपं लक्षयति॥ चक्षुर्मात्रेति॥ चक्षुर्मात्रग्राह्यत्वे विशिष्टगुणत्वं रूपस्य लक्षणं॥ विशेष्यमात्रोपादाने रसादावति-
व्याप्तिः॥ अतश्चक्षुर्मात्रग्राह्यत्वेति विशेषणं॥ तावन्मात्रोपादाने रूपत्वेऽतिव्याप्तिः॥ यो गुणो यदिन्द्रियग्राह्यस्तन्नि-
ष्ठा जातिस्तदिन्द्रियेण गृह्यते॥ अतस्तद्वारणाय विशेष्योपादानं॥ अत्र चक्षुर्मात्रग्राह्यत्वं नाम चक्षुर्भिन्नेन्द्रियाग्राह्य-
त्वे सति चक्षुर्ग्राह्यत्वं॥ मात्रपदानुपादाने संख्यादिसामान्यगुणेऽतिव्याप्तिः॥ संख्यादावपि चक्षुर्ग्राह्यत्वविशिष्टगुण-
त्वस्य सत्त्वात्॥ अतस्तत्रातिव्याप्तिवारणाय मात्रपदं॥ संख्यादेस्त्वग्भिन्नग्राह्यत्वात् चक्षुर्मात्रग्राह्यत्वं नास्ति॥ ६॥ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र लक्षणे ग्राह्यत्वं नाम लौकिकप्रत्यक्षविषयत्वं ॥ अग्राह्यत्वं नाम तदविषयत्वं ॥ तथा च ॥ चक्षुर्भिन्नेंद्रियजन्यत्वाव-
साक्षात्काराविषयत्वे सति चक्षुर्जन्यचाक्षुषविषयत्वमिति फलितोर्थः ॥ ननु प्रभाघटसंयोगे रूपलक्षणस्यातिव्याप्तिः ॥ तस्य चक्षुर्मा-
त्या० र० त्रग्राह्ययोगुणत्वादिति चेन्न ॥ गुणपदस्य विशेषगुणपरत्वात् ॥ न चैवं विशेषगुण[illegible]घटितलक्षणे संख्यादावतिव्याप्त्यसंभवान्मा-
त्रपदवैयर्थ्यमिति वाच्यं ॥ जलमात्रवृत्तिसांसिद्धिकद्रवत्वादावतिव्याप्तिवारणाय तदुपादानात् ॥ अथवा चक्षुर्मात्रग्राह्यजातिम-
द्गुणत्वस्य लक्षणत्वान्न प्रभासंयोगादावतिव्याप्तिः ॥ संयोगत्वजातेश्चक्षुर्मात्रग्राह्यत्वाभावात् ॥ घटसंयोगस्य त्वगिंद्रियग्राह्य-
त्वात् ॥ तद्वृत्तजातेरपि त्वगिंद्रियग्राह्यत्वात् ॥ यो गुणो यदिंद्रियग्राह्यस्तद्वृत्तिजातेरपि तदिंद्रियग्राह्यत्वात् ॥ अत्र जा-
तिघटितलक्षणे गुणत्वानुपादाने चक्षुर्मात्रग्राह्यजातिमति सुवर्णादावतिव्याप्तिः ॥ तद्वारणाय तदुपादानं ॥ एवं रसादि-
लक्षणे विशेषणानुपादाने लक्ष्यभिन्नगुणेष्वतिव्याप्तिः ॥ विशेष्यानुपादाने लक्ष्यमात्रवृत्तिरसत्वगंधत्वादावतिव्या-
प्तिः ॥ अतो विशेषणविशेष्ययोरुभयोरुपादानं ॥ स्पर्शं लक्षयति ॥ त्वगिंद्रियमात्रेति ॥ अत्रापि मात्रपदं संख्यादिसा-
मान्यगुणादावतिव्याप्तिनिवारणाय ॥ अन्यविशेषणकृत्यं पूर्ववद्बोध्यं ॥ ग्राह्यत्वपदार्थोपि पूर्ववदेव प्रत्यक्षविषय-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेजः

त्वस्वरूप एव बोध्यः॥ रूपादिचतुष्टयं पृथिव्यां पाकजमिति॥ एतत्तत्त्वनिर्णयश्चेत्थं॥ पाको नाम विजातीयः संयोगः॥ स च ना
नाजातीयः रूपजनको विजातीयतेजःसंयोगः तदपेक्षया रसजनको विजातीयः॥ एवं स्पर्शेऽपि तथैव॥ एवं प्रकारेण
भिन्नभिन्नजातीयाः पाकाः कार्यवैलक्षण्येन कल्पनीयाः॥ तृणपुंजनिक्षिप्ते आम्रादौ उष्णलक्षणविजातीयतेजःसं
स्पर्श योगात्पूर्वं हरितरूपनाशे नरूपांतरं पीतादेरुत्पत्तिः पूर्वरसस्याम्लस्यैवानुभावात्॥ हरितरूपसत्त्वेऽपि रसपरावृ
त्तिर्दृश्यते॥ विजातीयतेजःसंयोगरूपपाकवशात्॥ पूर्वतनाम्लरसनाशेन मधुररसस्यानुभावात्॥ तस्माद्रूपजनका
पेक्षया रसजनको विलक्षण एव॥ एवं गंधजनको विलक्षण एवांगीकार्यः॥ रूपरसयोः परावृत्तावपि पूर्वगंधनाशे
विजातीयपाकवशात्सुरभिगंधोपलब्धेः॥ एवं स्पर्शेऽपि पाकवशात् कठिनस्पर्शनाशे मृदुस्पर्शानुभवात्तस्माद्रूपा
दिजनका विजातीयपाकाः यथाकार्यमुन्नेयाः॥ अत एव पार्थिवपरमाणूनामेकजातीयत्वेऽपि पाकमहिम्ना विजा
तीयद्व्यणुकांतरारंभकत्वं यथा गोभुक्ततृणादीनामापरमाण्वंतभंगे तृणा रंभकपरमाणौ विजातीयतेजसः संयोगा पु२
त्पूर्वरूपादिचतुष्टयनाशे तदनंतरं दुग्धोपयोग्यरूपादिकं वर्तते॥ तादृशरूपरसगंधस्पर्शजनकास्तेजःसंयोगाः जा

ना१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंतेन द्रुतरं तैरेव तादृशरूपरसाद्युत्पद्यते। एतादृशरूपरसादिविशिष्टपरमाणुभिः द्व्यणुकमारभ्यते ततः त्र्यणुक
दिक्रमेण दुग्धारंभ इति॥ एवं दुग्धारंभैः परमाणुभिरेव दध्यारभ्यते॥ पाकमहिम्नाऽएवं दध्यारंभकैरेव परमाणुभिर्नव
कू२ नीतारंभ इति ॥ विभागं लक्षयति संयोगेति॥ संयोगनाशकत्वे विशिष्टगुणत्वं विभागस्य लक्षणं॥ विशेषणमात्रोपा
दाने क्रियायामपि संयोगनाशकत्वात्तत्रा व्याप्तिवारणाय गुणत्वं विशेषणं॥ गुरुत्वं लक्षयति आद्येति॥ द्वितीयपतनक्रि
यायां वेगस्यैवासमवायिकारणत्वात्तत्रातिव्याप्तिवारणायाद्येति॥ द्रुतरलक्षणे आद्यविशेषणमपि पूर्ववदेव योजनीयं॥ = द्रुतत्वलक्षणे =
स्नेहं लक्षयति॥ चूर्णादीति॥ पिंडीभा हेतुत्वे सति गुणत्वं स्नेहस्य लक्षणं॥ पिंडीभावो नाम चूर्णादेर्धारणाकर्षणहे
तुभूतो विलक्षणसंयोगः॥ तादृशसंयोगे स्नेहस्यैवासाधारणकारणत्वं॥ नतु जलादिगतद्रवत्वस्य॥ तथा सति द्रुतसु
वर्णादिसंयोगे चूर्णादेः पिंडीभावापत्तेः॥ अतः स्नेहस्यैवासाधारणकारणत्वं॥ विशेषणमात्रोपादाने कालादावति
व्याप्तिः॥ तद्वारणाय विशेष्योपादानं॥ वस्तुतस्तु द्रुतजलसंयोगस्यैव पिंडीभावहेतुत्वं॥ स्नेहस्य पिंडीभावहेतुत्वे मा
नाभावात्॥ जले द्रुतत्वविशेषणात् करकादिव्यावृत्तिः॥ शब्दं लक्षयति॥ श्रोत्रग्राह्येति॥ शब्दत्वे तिव्याप्तिवारणा
य गुणपदं॥ रूपादावतिव्याप्तिवारणाय श्रोत्रेति॥ स त्रिविधः। संयोगजो विभागजः शब्दजश्चेति॥ भेरीदंडसंयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यायबोधिनी॥
तर्कसंग्रहटी
का
॥५॥

मनस्त्रोभांकारादिशब्दः॥ हस्ताभिघातसंयोगजन्यो मृदंगादिशब्दः॥ वंशे पाट्यमाने दलद्वयविभागजन्यः पटप
टादिशब्दः॥ शब्दोत्पत्तिमारभ्य कर्णविवरपर्यंतं निमित्तपवनसंबंधाद्धारया जायते॥ अंत्यो नरशब्दे पूर्वशब्दः
कारणं॥ बुद्धेर्लक्षणमाह॥ सर्वव्यवहारेति॥ व्यवहारः शब्दप्रयोगः ज्ञानं विना शब्दप्रयोगासंभवात्॥ शब्दप्र
योगरूपव्यवहारहेतुत्वं ज्ञानस्य लक्षणं॥ बुद्धिं विभजते॥ स्मृतिरनुभवश्च॥ स्मृतिं लक्षयति॥ संस्कारेति॥ संस्का
रजन्यत्वविशिष्टज्ञानत्वं स्मृतेर्लक्षणं॥ विशेषणानुपादाने ऽनुभवेतिव्याप्तिः॥ तद्वारणाय विशेषणोपादानं॥
संस्कारध्वंसेतिव्याप्तिवारणाय विशेष्यपदं॥ ध्वंसं प्रति प्रतियोगिनः कारणत्वात् संस्कारध्वंसेपि संस्कारजन्य
त्वस्य सत्वात्॥ अनुभवं लक्षयति॥ तद्भिन्नेति॥ तद्भिन्नत्वं नाम स्मृतिभिन्नत्वविशिष्टज्ञानत्वं अनुभवस्य ल
क्षणं॥ विशेषणानुपादाने स्मृतावतिव्याप्तिः॥ विशेष्यानुपादाने घटादावतिव्याप्तिः॥ अतस्तद्वारणाय वि
शेषणविशेष्ययोरुपादानं॥ अनुभवं विभजते॥ स द्विविध इति॥ यथार्थानुभवं लक्षयति॥ तद्वतीति॥ तद्व
तीत्यत्र सप्तम्यर्थो विशेष्यत्वं॥ तच्छब्देन प्रकारीभूतो धर्मोऽवगंतव्यः॥ तथा च तद्विशेष्यकत्वे सति तत्प्रका
रकत्वं यथार्थानुभवस्य लक्षणं॥ उदाहरणं रजते इदं रजतमिति ज्ञानं रजतत्ववद्विशेष्यकत्वे सति

शिवशंकर
॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रंगतत्वप्रकारकं तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वमितिनिष्कर्षः अन्यथायथार्थ

ते रंगरजतयोरिमेरजतरंगे इत्याकारकसमूहालंबनेऽप्रमेतिव्याप्तिः तत्रापिरजतत्ववद्विशेष्यकत्वर

तत्वप्रकारकत्वयोरंगत्ववद्विशेष्यकत्वरंगत्वप्रकारकत्वयोः सत्वात् उक्तनिष्कर्षेतुरजतत्वप्रकारतायाः र

जतत्ववद्रजतविशेष्यतानिरूपितत्वाभावात् रंगत्वप्रकारतायाः रंगत्ववद्विशेष्यतानिरूपितत्वाभावात् एवं र

गत्वप्रकारतायाः रजतत्ववद्विशेष्यतानिरूपितत्वादिति अयथार्थानुभवंलक्षयति तदभाववतीति अ

त्रापिपूर्ववत् तदभाववद्विशेष्यतानिरूपिततन्निष्ठप्रकारताशालीज्ञानत्वं विवक्षणीयं अन्यथारंगरजतयोः

इमे रंगरजते इत्याकारकसमूहालंबनप्रमायामतिव्याप्तिः एतत्समूहालंबनस्य रंगरजतोभयविशेष्य

कत्वेन रंगत्वरजतत्वोभयप्रकारकत्वेन च रजतत्वाभाववद्रंगविशेष्यकत्वरजतत्वप्रकारकत्वयोः रंगत्वा

भाववद्रजतविशेष्यकत्वरंगत्वप्रकारकत्वयोश्च सत्वात् उक्तनिष्कर्षेतुरजतांशेरजतत्वावगाहित्वेन न च र

जतत्वप्रकारतायाः रजतत्वाभाववद्रंगविशेष्यतानिरूपितत्वाभावात् एवंरंगत्वप्रकारतायाः रंगत्वाभाववद्र

४= किंतुसमूहालंबनभ्रमस्यरंगांशेरजतत्वावगाहित्वेनरजतत्वप्रकारतायाः रंगत्ववद्विशेष्यतानिरूपितत्वात् =४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जतविशेष्यतानिरूपितत्वाभावात् नातिव्याप्तिः उदाहरणं यथास्मत्काविति यथार्थानुभवं विभजते चतुर्वि
धइति तत्करणमिति फलीभूतप्रत्यक्षादिकरणं चतुर्विधमित्यर्थः प्रत्यक्षादिचतुर्विधप्रमाणानां प्रमा
करत्वं प्रमाणसामान्यलक्षणं एकैकप्रमाणलक्षणं तु वक्ष्यते प्रत्यक्षज्ञाने इत्यादिना करणलक्षणमाह
असाधारणं कारणमिति व्यापारवदसाधारणकारणं करणमित्यर्थः असाधारणकारणत्वं च कार्यत्वव्या
प्यधर्मावछिन्नकार्यतानिरूपितकारणताशालित्वमित्यर्थः यथा दंडो घटादिकं प्रति असाधारणकारणं
कार्यत्वव्याप्यधर्मो घटत्वादिरूपधर्मस्तदवछिन्नकार्यतानिरूपितकारणताशालित्वं दंडे अतो घटं प्रति
दंडोऽसाधारणकारणं साधारणत्वं च कार्यतावछिन्नकार्यनिष्ठकार्यतानिरूपितकारणताशालित्वं ईश्वरा
दृष्टादेः कार्यत्वावछिन्नं प्रत्येव कारणत्वात् साधारणत्वं कारणं लक्षयति कार्यनियतेति कार्यप्रतिनिय
तत्वे सति पूर्ववृत्तित्वं कारणं नियतत्वविशेषणानुपादाने पूर्ववृत्तिनो रासभादेरपि घटादिकारणत्वं स्या
अतो नियतत्वे सतीति विशेषणं नियतपूर्ववृत्तिनो दंडरूपादेरपि घटकारणत्वं स्यात् अतोऽनन्यथासिद्ध
पदमपि कारणलक्षणे निवेशनीयं दंडरूपादीनां तु अन्यथासिद्धत्वात् कार्यं लक्षयति प्रागिति प्राग्भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वप्रतियोगित्वंकार्यस्यलक्षणं कार्योत्पत्तेःपूर्वंइहघटोभविष्यतीतिज्ञायते एतत्प्रतीतिविषयोभावः
प्रागभावस्तत्प्रतियोगिघटादिरूपंकार्यं कारणंत्रिविधमिति समवायिकारणमसमवायिकारणंनिमि
त्तकारणंचेति समवायिकारणंलक्षयति यत्समवेतमिति यस्मिन्समवेतं यत्समवायेन संबद्धंस
त्कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः उदाहरणं तंतवइति तंतुषुसमवायेनसंबद्धंसत्पटात्मकं
कार्यमुत्पद्यते तंतवःसमवायिकारणमित्यर्थः सामान्यलक्षणंतु समवायसंबंधावच्छिन्नकार्यतानि
रूपिततादात्म्यसंबंधावच्छिन्नकारणत्वंसमवायिकारणत्वमिति समवायसंबंधेन घटाधिकरणेकपा
लादौकपालादेस्तादात्म्यसंबंधेनसत्वात् समवायसंबंधावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिततता
दात्म्यसंबंधावच्छिन्नकारणतायाःकपालादौसत्वात् लक्षणसमन्वयः जन्यभावत्वावच्छिन्नंप्रतितता
दात्म्यसंबंधेनद्रव्यस्यैवकारणत्वात् जन्यभावेषु द्रव्यगुणकर्मसु त्रिषुद्रव्यमेवसमवायिकारणं द्रव्ये
व्यवः समवायिकारणमतोगुणादावपिद्रव्यमेवसमवायिकारणमित्याशयेनाह यत्समवेतरूपादे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिति समवायिकारणमित्यनुषज्जते असमवायिकारणंलक्षयति कार्येणेति कार्येणसहैकस्मिन्न
र्थेसमवेतंसत् यत्कारणंतदसमवायिकारणमित्यर्थः कारणेनसहैकस्मिन्नर्थेसमवेतंसद्यत्कारणं
तदसमवायिकारणमित्यन्वयः जन्यद्रव्यमात्रेअवयवसंयोगस्यैवासमवायिकारणत्वात्पटात्मक
कार्येतदवयवंतंतुसंयोगस्यैवासमवायिकारणत्वमितिदर्शयति यथातंतुसंयोगःपटस्येति पटात्म
ककार्येणसहैकस्मिन्नर्थेतंतौसमवेतंसत्समवायेनवर्तमानंसत्पटात्मकंकार्यंप्रतितंतुसंयोगात्मकं
कारणंअसमवायिकारणमित्यर्थः द्वितीयासमवायिकारणंदर्शयति कारणेनसहेत्यादिना तदुदाह
रति तंतुरूपमिति कारणेनसहपटरूपकारणीभूतपटेनसहैकस्मिन्नर्थेतंतुरूपार्थेसमवेतंसत्
समवायसंबंधेनवर्तमानंसत्तंतुरूपंपटरूपंप्रतिकारणंभवति अतोऽसमवायिकारणंतंतुरूपं
पटरूपस्य सामान्यलक्षणंतु समवायसंबंधावच्छिन्नकार्यतानिरू ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिता या समवायस्वसमवायिसमवेतत्वान्यतरसंबंधावच्छिन्नाकारणतातदाश्रयत्वं। समवायसंबंधावच्छि-
न्नाकपालद्वयसंयोगनिष्ठकारणताकपालद्वयसंयोगे वर्तते। एवमाद्यस्पंदनक्रियायां च गुरुत्वद्रवत्वे
असमवायिकारणे भवतः॥ आद्यपतनक्रियायां प्रत्याद्यस्पंदनक्रियां प्रति च समवायसंबंधेनैव तयोः कार-
णत्वात्। अवयविगुणादौ त्ववयवगुणादेः स्वसमवायिसमवेतत्वसंबंधेनैव कारणत्वात्॥ तत्संबंधावच्छिन्नकारण-
ताश्रयत्वमेव गुणादौ वर्तते। अवयवगुणस्य तु कपालतंतुरूपादेः स्वशब्दग्राह्यकपालरूपतंतुरूपसमवायि
कपालतंतुसमवेतत्वसंबंधेन घटपटादौ कपालरूपतंतुरूपयोश्च सत्त्वात्। तदुभयमभिन्नमिति। समवा-
य्यसमवायिभिन्नकारणमिति सूत्रार्थः॥ तदेतदिति॥ यदसाधारणमिति व्यापारवत्त्वे सतीत्यपि पूरणीयं। अ-
न्यथा तंतुकपालसंयोगयोरतिव्याप्तिः तंतुकपालसंयोगयोरपि कार्यत्वातिरिक्तपटत्वघटत्वावच्छिन्नं प्र-
ति कारणत्वादसाधारणत्वमस्त्येवेति॥ अतस्तत्र करणत्ववारणाय व्यापारवत्त्वे सतीति करणलक्षणे विशे-
षणं देयं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यापारत्वं च॥ तज्जन्यत्वे सति तज्जन्यजनकत्वं॥ अथ तिहि दंडजन्यत्वे सति दंडजन्यघटजनकता भ्रम्यादेः॥ अतो दंडव्या
पारत्वं॥ एवं कपालतंतुसंयोगादेरपि कपालतंतुव्यापारत्वं॥ कपालसंयोगस्य कपालजन्यत्वे सति कपालजन्यघटजन
कत्वात्॥ एवं तंतुसंयोगस्य तंतुजन्यत्वे सति तंतुजन्यपटजनकत्वात्॥ करणलक्षणे असाधारणविशेषणानुपादाने
ईश्वरादृष्टादेः=४ ईश्वरादृष्टादेरपि व्यापारवत्त्वात् करणत्वं स्यात्॥ तत्रातिव्याप्तिवारणाय असाधारणेति॥ षड्विधेंद्रियाश्च तत्प्रत्यक्षप्र
माणस्य लक्षणमाह॥ तत्रेति॥ प्रमाणचतुष्टये प्रत्यक्षात्मकं यज्ज्ञानं चाक्षुषादिप्रत्यक्षं तत्प्रति करणं व्यापारवदसाधा
रणमिंद्रियं भवति॥ अतः प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षस्य लक्षणं॥ अपि संनिकर्षातिरिक्तचतुर्विधसन्निक
र्षाणां समवायघटितत्वेनेंद्रियजन्यत्वाभावाद्व्यापारत्वं न संभवतीति इंद्रियमनःसंयोगस्यैव षड्विधप्रत्यक्षे ज
ननीये इंद्रियव्यापारता बोध्या॥ प्रत्यक्षप्रमाणलक्षणमुक्त्वा प्रत्यक्षप्रमालक्षणमाह॥ ज्ञानाकरणमिति प्रत्यक्ष
प्रमालक्षणं॥ ज्ञानं व्याप्तिज्ञानं सादृश्यज्ञानं पदज्ञानं तदेव करणं येषां ते ज्ञानकरणाः॥ अनुमित्युपमितिशाब्दाः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्भिन्नं प्रत्यक्षे इंद्रियाणामेव करणत्वात् न तु ज्ञानस्य करणत्वं ॥ इदं लक्षणमीश्वरप्रत्यक्षसाधारणं ईश्वरीयप्रत्यक्षस्याऽजन्यत्वात्
जन्यप्रत्यक्षस्यैव लक्ष्यत्वाभिप्रायेणोत्तरमाह ॥ इंद्रियार्थसंनिकर्षेति ॥ जन्यप्रत्यक्षस्यैव लक्ष्यत्वाभिप्रायेणेदं लक्षणं ॥ प्रत्यक्षं वि
भजते ॥ तद्द्विविधमिति ॥ निर्विकल्पकं सविकल्पकमिति ॥ प्रकारताशून्यत्वमेव निर्विकल्पकत्वमित्यर्थः ॥ निर्विकल्पके चतुर्थवि
षयता स्वीक्रियते ॥ न तु त्रिविधविषयतामध्ये कापि तत्र ॥ अतो विशेषणताशून्यत्वं विशेष्यताशून्यत्वं संसर्गताशून्यत्वम
पि लक्षणं संभवति ॥ सप्रकारकमिति ॥ विषयताया ज्ञाननिरूपितत्वात् ॥ ज्ञानस्य विषयतानिरूपकत्वेन प्रकारतानिरूप
कज्ञानत्वं सविकल्पकस्य लक्षणं ॥ उदाहरणं यथेति ॥ इदंत्वावच्छिन्नविशेष्यतानिरूपितडित्थत्वप्रकारताशालिज्ञानं ब्राह्म
णत्वप्रकारताशालिज्ञानं सविकल्पकमित्यर्थः ॥ चाक्षुषादिषड्विधप्रत्यक्षकारणीभूत षड्विधसन्निकर्षान्विभजते ॥ सं
विषयताऽ योग इत्यादिना ॥ द्रव्यवृत्तिलौकिकसंबंधेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयोगस्य कारणत्वं ॥ द्रव्यसमवेतवृत्तिलौकिकवि
षयतासंबंधेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवायस्य हेतुत्वं ॥ द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासंबंधे
न चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवेतसमवायस्य हेतुत्वं ॥ द्रव्यग्राहकाणींद्रियाणि चक्षुस्त्वङ्मनांसि त्रीण्येवं प्र एवकारेण [illegible]
[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नानि घ्राणरसनाश्रवणानि तु गुणग्राहकाणि। अतस्त्वगिंद्रियस्य सेंद्रद्रव्यग्रहणे लौकिकविषयतासंबंधेन तत्र च बाधच्छिन्नं त्वगि
त्वक्संयोगस्य कारणत्वं॥ एवं द्रव्यसमवेतवृत्तित्वाच्चाक्षुषे त्वगिंद्रिये त्वक्संयुक्तसमवायस्य हेतुता। द्रव्यसमवेते तोष्णत्वशी
तत्वादिजातिस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायस्य हेतुता॥ एवमात्मरूपद्रव्यमानसप्रत्यक्षे मनःसंयोगस्य हेतुता॥
आत्मसमवेतसुखादिमानसे मनःसंयुक्तसमवायस्य हेतुता॥ आत्मसमवेतसमवेतसुखत्वादिमानसे मनःसंयुक्तस
मवेतसमवायस्य हेतुता॥ रसनघ्राणयो रसगंधतद्गतजातिग्राहकत्वेन द्वितीयतृतीयसंनिकर्षयोरेव तत्र हेतुता वाच्या॥
श्रवणस्येंद्रियस्याकाशरूपत्वेन शब्दस्याकाशगुणत्वेन श्रवणेंद्रियेण च समं शब्दस्य समवाय एव सन्निकर्षः॥ शब्दत्वादिश
ब्दत्वगतत्वत्वादिजातिविषयकश्रावणप्रत्यक्षे समवेतसमवायस्य हेतुता॥ अभावप्रत्यक्षमिति॥ विशेषणविशेष्यभा
वो नाम विशेषणताविशेष्यतासन्निकर्षः॥ एवं च सन्निकर्षोपरि विशेषणताको ज्ञेया जानीया॥ तथाहि॥ द्रव्याधिकरणका
भावप्रत्यक्षे इंद्रियसंयुक्तविशेषणता द्रव्यसमवेताधिकरणकाभावप्रत्यक्षे इंद्रियसंयुक्तसमवेतविशेषणता द्रव्यस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समवेतसमवेताधिकरणकाभावप्रत्यक्षेऽपि संयुक्तसमवेतसमवेतविशेषणता॥ संयोगस्थाने संयुक्तत्वं प टयित्वा
समवायस्थाने समवेतत्वपदं घटयित्वा अभावप्रत्यक्षस्थले निर्वाह्यं॥ यथा पटद्रव्यसमवेतं घटत्वं नीलो रिक्तंचेत्
नीलारूपे पीताभावः पटत्वादि जातौ पटाभावश्च वर्तते स चाभावः संयुक्तसमवेतविशेषणतासन्निकर्षेण गृह्यते॥
एवं नीलत्वादि जातौ पीतत्वाभावोपि॥ इंद्रियसंयुक्तसमवेतसमवेतविशेषणतासन्निकर्षेण गृह्यते॥ घटसमवे
तं रूपं तत्समवेतत्वं नीले तद्विशेषण्यता पीतत्वाभावेन वर्तते॥ इति संसे प्र॰ ७॥ इति प्रत्यक्षपरिच्छेदः॥ ७॥ x॥
अनुमानं लक्षयति॥ अनुमितीति॥ अनुमितौ व्याप्तिज्ञानं करणं परामर्शो व्यापारः॥ अनुमितिः फलं कार्यमित्य
र्थः॥ परामर्शस्य व्याप्तिज्ञानजन्यत्वात् व्याप्तिज्ञानजन्यानुमितिजनकत्वात् तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्या
पारलक्षणमुपपन्नं॥ अनुमितिकरणत्वमनुमानस्य लक्षणं॥ अनुमानं व्याप्तिज्ञानं॥ एतस्य परामर्शरूपव्या
पारद्वारा अनुमितिं प्रत्यसाधारणकारणतया अनुमितिकरणत्वमुपपन्नं॥ परामर्शजन्यानुमिति॥ परामर्शजन्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्व

त्वे सतीति ॥ सति सप्तम्या विशिष्टत्वमर्थः ॥ परामर्शजन्यं विशिष्टज्ञानत्वमनुमितेर्लक्षणं ॥ तत्र ज्ञानत्वमात्रो
दाने प्रत्यक्षादावतिव्याप्तिः ॥ तन्निरासाय परामर्शजन्यत्वे सतीति विशेषणोपादानं ॥ विशेषणमात्रोक्तौ ध्वं
सेतिव्याप्तिः ॥ अतो ज्ञानत्वोपादानं ॥ व्याप्तिविशिष्टेति ॥ व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः ॥ व्याप्तिविशि
ष्टं च तत्पक्षधर्मताज्ञानं चेति कर्मधारयात् विशिष्टपदस्य प्रकारतापरत्वात् पक्षधर्मताज्ञानं इत्यत्र षष्ठ्यर्थविषय
त्वबोधनात् पक्षधर्मतापदस्य पक्षसंबंधार्थकत्वाच्च कर्मधारयसमासे समस्यमानपदार्थयोरभेदसंसर्ग
लाभेन च व्याप्तिप्रकारकत्वाभिन्नं यत्पक्षसंबंधविषयं ज्ञानं तत्परामर्श इति लभ्यते ॥ एवं सति धूमो वह्निव्याप्यो घट न ४
त वान्पर्वत इति समूहालंबनेऽपि परामर्शलक्षणं लगतिं द्वारत्वाय पक्षनिष्ठाया विशेष्यतायास्तन्निरूपिताया प्रका
रता हेतुनिष्ठा प्रकारता तदवच्छिन्ना या हेतुनिष्ठा [illegible] विशेष्यता तन्निरूपिताया प्रकारता व्याप्तिनिष्ठा
प्रकारता तच्छालि ज्ञानं परामर्श इ[illegible]ति निष्कर्षः ॥ एतादृशपरामर्शजन्यत्वे सति ज्ञानत्वं अनुमितेर्लक्षणं ॥

कं प ४

॥ श्री ॥

॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]

[illegible]

अनुमितिपरामर्शयोर्विशेष्यकार्यकारणभावश्चेत्थं ॥ पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगसंबंधावच्छिन्न
विधेयताकानुमितित्वावच्छिन्नं प्रति वह्निव्याप्तिप्रकारताया धूमत्वावच्छिन्नप्रकारतानिरूपितायाः पर्वतत्वावच्छि
न्नविशेष्यतातच्छालिनिर्णयः कारणमिति स च निर्णयः वह्निव्याप्यधूमवान् पर्वत इत्याकारकः ॥ यत्र यत्रेति यत्र
पदद्वीप्सावशात् धूमाधिकरणे यावति वह्निमत्त्वलाभात् ॥ यावत्पदमहिम्ना धूमव्यापकत्वं वह्नौ ॥ तस्मात् च यत्
नामसामानाधिकरण्यं ॥ तथा च ॥ धूमव्यापकवह्निसामानाधिकरण्यं व्याप्तिरित्यर्थः ॥ अत्र [illegible] व्यापकत्वं
नाम धूमसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं ॥ तादृशधर्मो वह्नेर्वह्नित्वं ॥ तथाहि
धूमाधिकरणपर्वतत्वे चैरमहानसादौ वर्तमानो योऽभावः घटत्वावच्छिन्नप्रतियोगिताकोऽभावः ॥ न तु वह्नित्वाव
च्छिन्नप्रतियोगिताकोऽभावः कुतः पर्वतादौ वह्नेः सत्त्वात् ॥ एवं सति धूमाधिकरणे पर्वतचत्वरादौ वर्तमान
स्य घटाभावस्य प्रतियोगितावच्छेदकं घटत्वं पटाभावस्य प्रतियोगितावच्छेदकं पटत्वं अनवच्छेदकं वह्नित्वं

धूमस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तादृशवृत्तित्वं [illegible] वन्हेर्वर्त्तते॥ अतो धूमव्यापकत्वं वन्हेरेव वर्त्तते इति इयमेवान्वयव्याप्तिः॥ सिद्धान्तानुसारेण॥
पूर्वपक्षी [illegible] या व्याप्तिस्तु प्रतियोगिव्यधिकरणसाध्याभाववदवृत्तित्वं॥ साध्यतावच्छेदकसंबंधावच्छिन्नसा
ध्यतावच्छेदकावच्छिन्नप्रतियोगिताकप्रतियोगितावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नप्रतियो
गिवैयधिकरण्यावच्छिन्नाभाववन्निरूपितं पक्षतावच्छेदसंबंधावच्छिन्नवृत्तित्वं तादृशवृत्तित्वावच्छिन्नप्र कृ४
तियोगिताकोऽभावो व्याप्तिः॥ तच्च केवलान्वयिन्यव्याप्तमिति सिद्धान्तानुसारेण द्रष्टव्यं॥ स्वार्थानुमानं नाम
स्वायाश्रयोऽन्यानुमानं। न्यायप्रयोज्यानुमानं परार्थानुमानं॥ न्यायत्वं च प्रतिज्ञाद्यवयवपंचकसमुदायत्वं॥
नेर अवयवत्वं प्रतिज्ञाद्यन्यतमत्वं॥ अन्वयेति॥ व्यापकसामानाधिकरण्यं व्याप्तिमानित्यर्थः॥ व्यतिरेकेणेति॥ व्या
तिरेको नाम अभावः॥ तथा च॥ साध्याभावेऽपि हेत्वभाववत्त्वं व्याप्तिर्व्यतिरेकव्याप्तिः॥ उपं च यत्र यत्र वन्ह्यभावः॥
तत्र तत्र धूमाभाव इति॥ यत्र पर्वतो यस्यावन्न्याभावव्यतियामनितिधूमाभावप्रहेणयावत्स्यादस्यव्यापकस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रतया धूमाभावे वन्ह्यभावव्यापकत्वं लभ्यं ॥ एवं च वन्ह्यभावनिष्ठा या व्याप्तिः ॥ स्वाश्रयीभूतवन्ह्यभावव्यापकीभूता
भावप्रतियोगित्वसंबंधेन धूमनिष्ठतया गृहीतव्यतिरेकव्याप्तिमत्वेन व्यतिरेकित्वेन धूमव्यापकवन्हिसामानाधिक
रण्यरूपान्वयव्याप्तिमत्वेनान्वयित्वेन च गीयते ॥ व्यतिरेकपरामर्शस्तु वन्ह्यभावव्यापकीभूताभावप्रतियोगिधूमवा
न्पर्वत इत्याकारकः ॥ व्यतिरेकव्याप्तिशून्यत्वे सत्यन्वयव्याप्तिमत्वं केवलान्वयित्वं ॥ साध्ये केवलान्वयित्वमभावाप्र
तियोगित्वं ॥ तथा चाभावाप्रतियोगिसाध्यव्यापकत्वं केवलान्वयिहेतोर्लक्षणं ॥ एतल्लक्षणं हेतो व्यतिरेकशून्य
५६ त्वे सति संगच्छते साध्यस्य केवलान्वयित्वादेव व्यतिरेकव्याप्त्यभावादन्वयमात्रव्याप्तिकं केवलान्वयीति मूलकारो
क्तलक्षणमुपपन्नं ॥ अत्यंताभावाप्रतियोगित्वं केवलान्वयित्वं ॥ न चैवं संयोगाभावे कालाभावे चाव्याप्तिरिति वा
च्यं ॥ स्वविरोधिवृत्तिमदत्यंताभावाप्रतियोगित्वस्य तदर्थत्वात् ॥ एकजातीयसंबंधेन सर्वत्र विद्यमानत्वं केवला
न्वयित्वमिति नव्याः ॥ अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्वं केवलव्यतिरेकित्वं ॥ यथा पृथिवीति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र पृथ्वीत्वावच्छिन्नं पक्षः॥ पृथिवी इतरजलाद्यष्टभेदः साध्यः॥ गंधवत्त्वं हेतुः॥ अत्र यत्र तु गंधवत्तत्तदितरभे
दवत् इत्यन्वयदृष्टांताभावात् गंधव्यापके तरभेदसामानाधिकरण्यरूपान्वयव्याप्तिग्रहासंभवात्॥ किंतु यत्र यत्रेतरभेदाभावस्तत्र
वः तत्र तत्र गंधाभावः॥ यथा जलादिकमिति॥ व्यतिरेकदृष्टांतजलादावितरभेदाभावरूपसाध्याभावव्यापकता गंधाभा
न४ वे दृश्यते॥ अमुमेवार्थं मनसि निधाय यन्नेतरेभ्यो भिद्यते न तद्गंधवत्॥ यथा जलमिति॥ ग्रंथेन मूलकारो व्यतिरेकव्याप्ति
मेव प्रदर्शितवान्॥ एवं व्यतिरेकव्याप्तिग्रहानंतरं इतरभेदाभावव्यापकीभूताभावप्रतियोगिगंधवती पृथ्वीत्याकारक
व्यतिरेकपरामर्शात्॥ पृथ्वीत्वावच्छिन्नोद्देश्यतानिरूपितेतरभेदत्वावच्छिन्नविधेयताक पृथिवीतरभेदवतीत्याकारका
नुमितिर्जायते इति वक्तव्यं॥ यथा श्रुतमूलार्थस्तु यथा जलमिति॥ यथा जलमितरभेदाभाववदिति भावः॥ न चैवं तथेति
॥ इतरभेदाभावव्यापक गंधाभाववती न किंतु तदभावाभाववत्त्वात् गंधवतीत्यर्थः॥ तस्मान्न तथेति॥ न च एवं गंधाभा
वाभावरूपस्य परामर्शेन तस्मादिति पंचम्युक्ता॥ तथा चेतरभेदाभावाभाववती इतरभेदवतीत्यर्थः॥ संदिग्धेति॥ साध्य

य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मकारकसंदेहविशेष्यत्वं पक्षत्वं ॥ अनुमितिः पूर्वं साध्यसंदेहो नियमेन जायते इत्यभिप्रायेण इदं लक्षणं प्राचीनैः कृतं ॥
गगनविशेष्यकमेघप्रकारकसंदेहाभावदशायामपि गृहमध्यस्थपुरुषस्य घनगर्जितश्रवणेन गगनं मेघवदित्याका
रकानुमितिर्जायते ॥ गगनावच्छिन्नोद्देश्यतानिरूपितमेघत्वावच्छिन्नविधेयताकानुमितिदर्शनात् प्राचीनमतं विहाय
नवीनैरनुमित्युद्देश्यत्वं पक्षत्वमिति सिद्धान्तीकृतं ॥ निश्चितसाध्येति ॥ साध्यप्रकारकनिश्चयविशेष्यत्वं सपक्षत्वं ॥
साध्याभावप्रकारकनिश्चयविशेष्यत्वं विपक्षत्वं ॥ निश्चयो वन्ह्यभाववानित्याकारकः ॥ एवं संदेहं तु निरूप्य हेत्वा
भासान्निरूपयति ॥ सव्यभिचारेति ॥ हेतुवदाभासन्त इति हेत्वाभासाः ॥ दुष्टहेतव इत्यर्थः ॥ दोषाश्च व्यभिचारवि
रोधसत्प्रतिपक्षासिद्धबाधा एतद्विशिष्टा दुष्टहेतव इत्यर्थः ॥ हेतौ दोषत्वं चानुमितिप्रतिबंधो व्याप्तिज्ञान
प्रतिबंधो वा जायते ॥ अतो वादिनिग्रहार्थं वादिनोद्भावितहेतौ दोषोद्भावनार्थं दुष्टहेतुनिरूपणमित्यर्थः ॥ पर्व
तो वन्हिमान्प्रमेयत्वादित्यत्र प्रमेयत्वहेतौ वन्ह्यभाववद्वृत्तित्वरूपव्यभिचारसत्वे तु वन्ह्यभाववदवृत्तित्वरूपव्याप्ति
ग्रहप्रतिबंधः फलं ॥ असाधारणइति ॥ सर्वसपक्षव्यावृत्तत्वं निश्चितसाध्यवद्व्यावृत्तित्वं ॥ साध्यवद्व्यावृत्तित्वं च साध्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सामानाधिकरण्यं हेतौ साध्यासामानाधिकरण्येति भिन्ने साध्यसामानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबंधः फलं ॥
अनुपसंहारिणं लक्षयति ॥ अन्वयेति ॥ उभयदृष्टांताभावादन्वयव्याप्तिज्ञानव्यतिरेकव्याप्तिज्ञानोभयसामग्री
नास्तीत्यर्थः ॥ पक्षातिरिक्ताप्रसिद्धेरिति भावः ॥ विरुद्धं लक्षयति ॥ साध्याभावेति ॥ तथा च साध्याभावव्याप्यहे
तुप्रकारकज्ञानात् पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबंधः फलं ॥ एवं सत्प्रतिपक्षोपि ॥ विरुद्धसत्प्रति
पक्षयोर्विशेषस्तु विरुद्धहेतौ रेकत्वेन सत्प्रतिपक्षे हेतोर्द्वित्वेन चेत्तानव्यः ॥ सत्प्रतिपक्षे द्वौ हेतु विरुद्धत्वे एको हेतुरि
ति यावत् ॥ साध्याभावसाधकहेतुः साध्यसाधनत्वेनोपन्यस्त इत्यसामर्थ्यस्तु वक्तुमपि भवति ॥ असिद्ध
इति ॥ पक्षतावच्छेदकविशिष्टपक्षाप्रसिद्धिर्यथा गगनीयत्वविशिष्टपक्षासिद्धेः ॥ सोरस्यानुमितिर्न संभवति ॥
स्वरूपासिद्धिर्नाम पक्षे हेत्वभावः ॥ तथा च हेत्वभावविशिष्टपक्षज्ञानात् पक्षविशेष्यकहेतुप्रकारकपरा
मर्शानुत्पत्त्या परामर्शप्रतिबंधः फलं ॥ व्याप्यत्वासिद्धमिति ॥ प्रकृते धर्मव्यापकत्वं आर्द्रेंधनेप्रहीतं चेत्धूमेप्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीमद्गणेश॥

ईंधनव्यापकत्वं गृहीतं॥ एवं चैव वह्नेर्व्यापकत्वं आर्द्रेंधने गृहीतं चेत् वह्नौ तद्व्याप्यत्वं गृहीतं तदेव व्यभि
चारित्वं॥ तथा चोपाधिव्यभिचारित्वं साधने गृहीतं चेत्तदुपाधिमत्ता ईंधनसंयोगसाध्य धूमव्यभिचारि
त्वं गृहीतं [illegible]॥ अनुमानप्रकारस्तु पूर्वानुमाने हेतुं पक्षीकृत्य वह्निः धूमव्यभिचारी धूमव्यापकार्द्रेंध
नव्यभिचारित्वात्॥ घटत्वा[illegible]त्॥ यो यत्साध्यव्यापकव्यभिचारी स सर्वोपि साध्यव्यभिचारी॥ धू
मव्यापक एवं प्रकारेण प्रकृतानुमाने हेतुमति पक्षे साध्यव्यभिचारो व्यापकतया दूषकत्वमुपाधे[illegible]॥ [illegible]
थात्॥ धूमाभाववद्वृत्तिरूप धूमव्यभिचारे गृहीते वह्नौ धूमाभाववद्वृत्तित्वरूपव्याप्तिग्रहप्रतिबंधः
कृतं॥ यस्येति॥ यस्य हेतोः साध्याभावः सच प्रमाणांतरेणानि[illegible]॥ तथाच प्राप्त्यसिद्धः साध्याभावनि
श्चयेनानुमितिप्रतिबंध[illegible]॥ शुभं॥ इति श्री [illegible]
नयः[illegible]॥ ७॥ श्री॥ शुभं॥ ॥ ७ श्री ७ ॥ ६ श्री ७ ७॥ ७ ७ श्री ॥ ७ श्री ७॥ शु॥ श्री॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपमानं लक्षयति ॥ उपमितीति ॥ उपमितिं लक्षयति ॥ संज्ञासंज्ञीति ॥ संज्ञापदं संज्ञार्थः ॥ तयोः संबं-
धः शक्तिः ॥ तथा च पदपदार्थसंबंधज्ञानं उपमितिरित्यर्थः ॥ उपमानं मितिं देशवाक्यार्थज्ञानं ॥ अति-
देशवाक्यार्थस्मरणं व्यापारः ॥ गोसदृशो गवय इत्याकारात् ॥ गोसदृशत्वावच्छिन्नविशेष्यक गवयपदवा-
च्यत्वप्रकारकज्ञानं जायते तदेव करणं ॥ इत्युपमानपरिच्छेदः ॥ ७ ॥ शब्दं लक्षयति ॥ आप्तेति ॥ पदज्ञा-
नं करणं वृत्तिज्ञानसहकृतं पदज्ञानकरणं अन्यपदार्थोपस्थितिर्व्यापारः ॥ वाक्यार्थज्ञानं ॥ फलं तच्छा-
ब्दबोधः ॥ वृत्तिर्नाम शक्तिलक्षणान्यतररूपा ॥ शक्तिर्नाम घटादिविशेष्यक घटादिपदजन्यबोधविष-
यत्वप्रकारक ईश्वरसंकेतः ॥ ईश्वरसंकेतो नाम ईश्वरेच्छा सैव शक्तिरित्यर्थः ॥ शक्तिनिरूपकत्वमेव पदे शक्त-
त्वं ॥ विषयतासंबंधेन ज्ञानाश्रयत्वं शक्यत्वं ॥ शक्यसंबंधो लक्षणा ॥ सा द्विविधा ॥ गौणी शुद्धा चेति ॥ गौणी
नाम सादृश्यविशिष्टलक्षणा ॥ यथा सिंहो माणवक इत्यादौ सिंहपदस्य सिंहविशिष्टे लक्षणा ॥ शुद्धा सादृश्य०

॥ शिव ॥
॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पि द्विविधा॥ जहल्लक्षणाऽजहल्लक्षणा चेति॥ लक्ष्यतावच्छेदकरूपेण लक्ष्यमात्रबोधिका जहल्लक्षणा॥ यथा
गंगायां घोष इत्यत्र गंगापदस्य स्वप्रवाहसंबंधस्य तीरे सत्वात् तादृशशक्यसंबंधरूपलक्षणावत्वात्॥ गंगापदा
त्तीरोपस्थितिः लक्ष्यतावच्छेदकरूपेण लक्ष्यशक्योभयबोधप्रयोजिका अजहल्लक्षणा यथा काकेभ्यो द
धि रक्ष्यतामित्यादौ काकपदस्य दध्युपघाते लक्षणा॥ लक्ष्यतावच्छेदकं दध्युपघातकत्वं तेन रूपेण दध्युप
घातकानां काककबिडालकुक्कुटसारमेयादीनां सर्वेषां च बोधात्॥ जहदजहल्लक्षणा वेदांतीनां मते॥ आ
कांक्षेति॥ व्यवहितोत्तरत्वादिसंबंधेन पदपदार्थस्य तत्प्रकारकज्ञानव्यतिरेकप्रयुक्तो यादृशशाब्दबोधा
भावः तादृशशाब्दबोधे तत्पदे तत्पदवत्वमाकांक्षा तादृशाकांक्षाज्ञानं शाब्दकारणं॥ अर्थाबाध इति॥
बाधाभावो योग्यतेत्यर्थः॥ अग्निना सिंचेदित्यत्र सेककरणत्वस्य जलादिधर्मस्य वह्नौ बाधनिश्चय
सत्वात्॥ तादृशवाक्यात् शाब्दबोधो न संभवति॥ आसत्तिं निरूपयति॥ पदानामिति॥ असहोच्चारि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तांनि॥ वैदिकं वेद इत्यर्थः॥ इदमुपलक्षणं॥ वेदमूलस्मृत्यादीन्यपि प्रमाणानि॥ लौकिक इति॥ आप्तत्वं
प्रयोग[illegible]हेतुभूतयथार्थज्ञानवत्वं॥ इति शब्दपरिच्छेदः॥७॥ यथार्थानुभवं निरूप्यायथार्था
नुभवं विभजते॥ संशयेत्यादिना॥ एकेति॥ एकधर्मावच्छिन्नविशेष्यतानिरूपितभावाभाव
प्रकारकं ज्ञानं संशय इत्यर्थः॥ विपर्ययो नाम भ्रम इत्यर्थः॥ व्याप्यारोपेति॥ तर्के व्याप्यस्य व्याप
कस्य व्यतिरेकनिश्चयः कारणं॥ अन्यथाबाधनिश्चयाभावे इष्टापत्तिदोषेण तर्कानुपपत्तेः॥ सु
खं निरूपयति॥ अनुकूलेति॥ इतरेच्छानधीनेच्छाविषयत्वमिति निष्कर्षः॥ यथाश्रुतेऽनुक
सु० लत्वप्रकारवेदनीयस्य घटोऽनुकूल इत्याकारकज्ञानदशायामनुकूलत्वप्रकारकज्ञानविशे
ष्यकत्वस्य घटादावपि सत्त्वात्॥ घटादावतिव्याप्तिरिति निष्कृष्टमुक्तं॥ गौणनादावतिव्याप्तिवारणाय इतरे

च्छा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्छानधीनेच्छेतीच्छाविशेषणं॥ सुखेच्छायाः सुखत्वप्रकारकज्ञानमात्रजन्यत्वान्नु॥ दुःखं निरूपयति॥ प्रतिकू-
लेति॥ अन्यापीतरद्वेषानधीनद्वेषविषयत्वमिति निष्कृष्टलक्षणं॥ द्वेषविषयत्वमात्रोक्तौ सर्पादावतिव्याप्तिः॥
तद्वारणायेतरद्वेषानधीनेति द्वेषविशेषणं॥ सर्पजन्यदुःखादौ द्वेषात्सर्पेऽपि द्वेष इति॥ सर्पस्य सर्पजन्यदुःख-
द्वेषजन्यद्वेषविषयत्वात्॥ अन्यद्वेषानधीनद्वेषविषयत्वरूपदुःखलक्षणस्य सर्पादौ नातिव्याप्तिः॥ फलेच्छा
उपायेच्छां प्रतिकारणं॥ अतः फलेच्छावशादुपायेच्छा भवति॥ एवं फलद्वेषादुपाये द्वेषः॥ धर्माधर्मौ निरूपय-
ति॥ विहितेति॥ वेदविहितेत्यर्थः॥ निषिद्धेति॥ वेदनिषिद्धेत्यर्थः॥ बुद्ध्यादयोऽष्टाविति॥ बुद्धिसुखदुःखेच्छा-
द्वेषप्रयत्नधर्माधर्मा इत्यर्थः॥ संस्कारं विभजते॥ संस्कारेति॥ कर्म निरूपयति॥ चलनात्मकमिति॥ सा-
मान्यं निरूपयति॥ नित्यमनेकानुगतमिति॥ नित्यत्वे सति अनेकसमवेतत्वं जातेर्लक्षणं॥ नित्यत्वविशे-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षणं। आत्मानुपादानेऽनेकसमवेतत्वमात्रोपादाने संयोगादावतिव्याप्तिः॥ तत्रापि अनेकद्रव्यसमवेतत्वस्य सत्त्वात्।
तद्वारणाय नित्यत्वोपादानं। अनेकसमवेतत्वानुपादाने नित्यत्वमात्रोपादाने आकाशादावतिव्याप्तिस्तद्वारणाय अनेकस
मवेतत्वविशेषणं॥ अनेकसमवेतत्वानुपादाने नित्यत्वविशिष्टसमवेतमात्रोक्तौ वाकाशगतैकत्वपरिमाणादौ जलपर
माणुगतरूपादौ चातिव्याप्तिः॥ जलपरमाणुगतरूपादेराकाशगतैकत्वपरिमाणादेर्नित्यत्वात् समवेतत्वाच्चातो
नेक इति समवेतविशेषणं॥ समवायं निरूपयति॥ नित्येति॥ संबंधत्वं विशिष्टप्रतीतियामकत्वं॥ तावन्मात्रो
क्तौ संयोगेतिव्याप्तिरतो नित्येति विशेषणं प्रागभावं निरूपयति॥ अनादीति॥ ध्वंसं निरूपयति॥ सादीति॥
अत्यंताभावं निरूपयति॥ त्रैकालिकेति॥ अन्योन्याभावं निरूपयति॥ तादात्म्येति॥ सर्वेषामपीति॥ प्रमाण
प्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजातिनिग्रहस्थाना
नां १६ तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायस्यादिमसूत्रे उक्तानां विस्तरस्तो न्यत्रानुसंधेयः॥ प्रमाणप्रमे

॥शिव॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यादीनामभीत्यर्थः ॥ ७ ॥ इति श्रीगोवर्धनपंडितवर्यविरचिता न्यायबोधिनीसमाख्याता तर्कसंग्रह
टीका समाप्ता ॥ छु ॥ लिखितं पुस्तकं विठ्ठलपंडितपुत्रेण विश्वनाथशिष्येण गंगाधरेण ॥
पुस्तकं च तस्यैव ॥ श्री शिवार्पणमस्तु ॥ ॥ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतियोग्यसमानाधिकरणात्यत्समानाधिकरणात्यंताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः॥

KKSU LIBRARY
RAMTEK
441 106
M 1453
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.10.20 12:31
,TRANSFERRED=2020/10/05 at 12:35:30
,PAGES=34
,TYPE=STD
,NAME=S0003852
,Book Name=M-1453-NYAYVIDHINI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection